# ७ धर्मश्च व्यवहारश्च चरित्रं राजशासनम्




(अध्यापकः कक्षायां प्रविशति। सर्वे छात्राः उत्थाय तम् अभिवदन्ति।)

**छात्राः** – सादरं प्रणामाः मान्यवर!

**अध्यापकः** – नमो नमः। एवं भासते भवन्तः किञ्चित् प्रष्टुम् इच्छन्ति!

**छात्राः** – आम् महोदय!

**अध्यापकः** – शोभनम्! पृच्छन्तु!

**दक्षः** – महोदय! वयं भवतः कथनानुसारं ह्यः पुस्तकालयं गतवन्तः। तत्र वयम् *अर्थशास्त्रम्* इति ग्रन्थं दृष्टवन्तः। अस्य ग्रन्थस्य विषये अस्माभिः बहुधा श्रुतम् आसीत्। अस्मिन् विषये वयम् अधिकं ज्ञातुम् इच्छामः।

**अध्यापकः** – शोभनम्! *अर्थशास्त्रं* तु आचार्येण कौटिल्येन लिखितम्। तत्र आचारः व्यवहारः नागरिकाणां कर्तव्यानि इत्यादयः विषयाः विस्तरेण वर्णिताः

सन्ति। भूमेः लाभाय संरक्षणाय च यावन्ति अर्थशास्त्राणि पूर्वाचार्यैः प्रस्तावितानि प्रायशः तानि सर्वाणि संहृत्य एव इदम् *अर्थशास्त्रं* रचितम्।

**श्रुतिः** – अस्तु आचार्य! अद्य विविधेषु देशेषु अस्माकं देशे च यादृशी शासनव्यवस्था प्रचलिता, किं तादृशी एव शासनव्यवस्था *अर्थशास्त्रे* अपि उल्लिखिता?

**अध्यापकः** – नूनमस्ति। तथा हि इदं पद्यं तत्र उक्तम् –

**स्वाम्यमात्य-जनपद-दुर्ग-कोश-दण्ड-मित्राणि प्रकृतयः।** (६.२.२७)

**श्रुतिः** – महोदय ! अस्य कः अभिप्रायः ?

**अध्यापकः** – अत्र स्वामी इत्यनेन शासनप्रमुखः, अमात्यः इत्यनेन मन्त्री, जनपदः इति जनानां वासयोग्यः भूभागः, दुर्गं नाम सुरक्षाचक्रम्, कोशः नाम सर्वकारीयवित्तसंग्रहः, दण्डः नाम प्रजानुशासनव्यवस्था, मित्राणि इत्युक्ते सुहृद्देशाः च।

**वागीशः** – श्रीमन्! अधुना मम जिज्ञासा वर्धते तदानीं न्यायव्यवस्था कीदृशी आसीत् इति।

**अध्यापकः** – धर्मः व्यवहारः चरित्रं राजशासनं च इति न्यायस्य चत्वारः पादाः। एतैः एव विवादानां समाधानं भवति स्म।

**वागीशः** – महोदय! धर्मः सत्ये प्रतिष्ठितः इत्यस्य कः अभिप्रायः ?

**अध्यापकः** – धर्मानुसारमेव न्यायः भवेत् इति अभिप्रायः।

**श्रुतिः** – आचार्य! व्यवहारः कः ? चरित्रं किम्? राजशासनं किम्?

**अध्यापकः** – वागीश! भवान् वदतु, भवान् अस्मिन् विषये किं चिन्तयति ?

**वागीशः** – व्यवहारः इत्युक्ते सन्देहस्थलेषु साक्षिभिः समाधानम्। चरित्रम् इत्युक्ते सतां व्यवहारः। राजशासनम् इत्यस्य च अभिप्रायः राज्ञा दत्तः निर्णयः। उक्तं हि –

© NCERT not to be republished


**धर्मश्च व्यवहारश्च चरित्रं राजशासनम्।**
**विवादार्थश्चतुष्पादः पश्चिमः पूर्वबाधकः॥**

**अत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु।**
**चरित्रं सङ्ग्रहे पुंसां राज्ञामाज्ञा तु शासनम्॥**

**अध्यापकः** – अतीव शोभनं वागीश!

**श्रीवाणी** – श्रीमन्! अद्यापि एतेषां पादानाम् अनुप्रयोगः भवति किम्?

**अध्यापकः** – भवति, वत्से! 'यतो धर्मस्ततो जयः' इति भारतीयोच्चतमन्यायालयस्य ध्येयवाक्यम् अस्ति। अस्मिन् वाक्ये वयं धर्मस्य प्रतिष्ठामेव पश्यामः। एवमेव 'सत्यमेव जयते' 'धर्मचक्रप्रवर्तनाय' इत्यादीनि प्रसिद्धानि ध्येयवाक्यानि यद्यापि तत्र तत्र अनुप्रयुक्तानि एव।




© NCERT not to be republished

**मुदिता** – रोचकः खलु अयं प्रसङ्गः। शासकानां कर्तव्यविषये अपि नूनं तत्र चर्चा कृता स्यात्?

**अध्यापकः** – उक्तमेव —

**विद्याविनीतो राजा हि प्रजानां विनये रतः।**
**अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः॥** (१.२.५)

राज्ञः जीवनं प्रजासेवने समर्पितं स्यात्। तस्य वैयक्तिकं प्रियं तत्र न मुख्यम्। एवं राज्ञः कर्तव्यानि उक्तानि।

**श्रुतिः** – आचार्य! अहमपि एकं श्लोकं स्मरामि।

**प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥** (१.१९.३९)

**मुदिता** – नागराणां संरक्षणं व्यवस्थापनञ्च कथं अस्मिन् ग्रन्थे चिन्तितमस्ति?

**अध्यापकः** – कोषपूर्वाः सर्वारम्भाः। (२.८.१–२) इत्युक्तिः अस्ति तस्मात् कोशस्य व्यवस्था महत्त्वपूर्णा। सर्वेषां मनुष्याणां भोजनादीनां व्यवस्थापनं कोषस्य प्रयोजनम्।

**वागीशः** – अहो, उत्तमम्! किन्तु आचार्य! प्राचीनकाले कोषे धनं कथम् आयाति स्म?

**अध्यापकः** – करव्यवस्था तस्मिन् कालेऽपि आसीत्। धान्यषड्भागं पण्यदशभागं हिरण्यं च कररूपेण देयम् इति नियमः आसीत्।

**अध्यापकः** – छात्राः! *अर्थशास्त्रे* अन्येऽपि तादृशाः विषयाः सन्ति ये अद्यापि महत्त्वपूर्णाः सन्ति। संविधानकर्तृभिः बहवः अंशाः ततः एव स्वीकृताः। अत्र मया केवलं भवतां जिज्ञासा–शमनार्थं दिङ्मात्रं उक्तम्। अग्रे भवद्भिः पुस्तकपठने प्रयत्नो विधेयः।

**श्रीवाणी** – श्रीमन्! वयं कृतज्ञाः। वयम् अवश्यमेव *अर्थशास्त्रं* भारतीयसंविधानं च पठित्वा परस्परं चर्चां च कृत्वा अधिकम् अधिगन्तुं प्रयत्नं करिष्यामः।

**अध्यापकः** – शुभमस्तु प्रेयांसः। सुखं जीवन्तु!

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**अस्मिन् पाठे विद्यमानानाम् अनेकेषां पदानां विविधाः अर्थाः अत्र प्रदत्ताः —**

| पदम् | | नानार्थाः |
|---|---|---|
| प्रकृतिः | – | स्वभावः, स्वरूपः, निसर्गः, राज्याङ्गानि, माया, आगमः |
| नागरम् | – | नगरे भवम्, शुण्ठी, पौरम् |
| प्रणाली | – | क्रमः, funnel |
| व्यवहारः | – | Lawsuit, deal, स्वभावः |
| अर्थः | – | विषयाः, meaning, प्रयोजनम्, धनम्, याचनम् (धातुः) |
| दण्डः | – | Stick, सेना, Punishment |
| कोशः/कोषः | – | उभौ अपि शब्दौ भण्डारार्थे समानार्थकौ स्तः |

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| भासते (√भास्, लट्,प्र.पु.ए.व.) | ज्ञायते | लगता है | seems to be | |
| नागरकर्तव्यानि षष्ठीतत्पुरुषः | नागराणां कर्तव्यानि | नागरिक के कर्तव्य | duty of a citizen | |

| | | | | |
|---|---|---|---|---|
| संहत्य (सम्+√ हृ + क्त्वा, ल्यप्) | समाहारं कृत्वा | इकट्ठा करके | bringing together | |
| शासनव्यवस्था षष्ठीतत्पुरुषः | शासनस्य व्यवस्था | शासन की व्यवस्था | governing system | |
| व्यवस्थिता (वि + अव + √ स्था + क्त ) | क्रमानुसारं कृता | क्रमबद्ध की हुई | arrangement | |
| भक्ष्याभयव्यवस्था (षष्ठीतत्पुरुषः) | भोजनस्य अभयस्य च व्यवस्था | भोजन और भयरहित जीवन की व्यवस्था | according to system of food and security | |
| सर्वकारीयवित्तकोषः (कर्मधारय) | सर्वकारीयः चासौ वित्तकोषः | सरकारी कोष | government treasury | |
| शासनप्रशासन व्यवस्था (षष्ठीतत्पुरुषः) | शासनस्य प्रशासनस्य व्यवस्था | शासन और प्रशासन की व्यवस्था | system of governance and administration | |
| योजयितुम् (√ युज्+ णिच्, तुमुन्) | योजनं कर्तुम् | जोड़ने के लिए | to add on | |
| जिज्ञासा (स्त्री.प्र.वि.ए.व.) | ज्ञातुम् इच्छा | जानने की इच्छा | thirst for knowledge | |
| चर्चिता (√ चर्च्+क्त) | चर्चा कृता | विचारविमर्श किया हुआ | well discussed | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| विवादसमाधानम् (षष्ठीतत्पुरुषः) | विवादस्य समाधानम् / मतभेदपरिहारः | मतभेद का समाधान | dispute resolution | |
| अस्पष्टता (नञ् तत्पुरुषः) | न स्पष्टता | अव्यक्त/अस्पष्ट | unclear | |
| अवलोकनम् (अव+√लोक्+ ल्युट् + अन्) | निरीक्षणम् | ध्यानपूर्वक देखना | obeservation | |
| पूर्वापेक्षया (षष्ठीतत्पुरुषः) | पूर्वं कथितस्य अपेक्षया | पूर्व की अपेक्षा | than earlier | |
| उच्चतमन्यायालयस्य (कर्मधारय) | भारतस्य उच्चतमन्यायालयस्य | सर्वोच्च न्यायालय का | of the supreme court | |
| ध्येयवाक्ये (नपुं.स.वि.ए.व.) | लक्ष्यपरिचायके वाक्ये | ध्येय के प्रेरक वाक्य में | in the motto | |
| भारतीयसंसद् (कर्मधारय) | भारतीया चासौ संसद् | भारत की संसद | the parliament | |
| उद्घोषयन्ति (उद्+√घुष्+ णिच्, लट्.प्र.पु.ब.व.) | उच्चैस्तरां वदन्ति | घोषणा करते हैं | announcing | |
| भुङ्क्ते (√भुज्, आत्मने.,लट्.प्र. पु.ए.व.) | खादति | भोजन करता है | eating | |
| सर्वभूतहिते (नपुं.स.वि.ए.व.) | सर्वेषां जीवानां हितकारिणि | सब का हित करने में | for well being of all | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| शिष्टाचारवान् (षष्ठी तत्पुरुषः+मतुप्) | शिष्टानां /सज्जनानां आचारः तद्वान् | शिष्टाचार से सम्पन्न | courteous | |
| दिशानिर्देशः (पु.प्र.वि.ए.व.) | पथप्रदर्शकम् | मार्गदर्शन | giving directions to move on | |
| आत्मप्रियम् (पु.द्वि.वि.ए.व.) | स्वस्य अनुकूलम् | अपना प्रिय | favourite | |
| अवेक्षेत (अव्+√ईक्ष्, वि.लि. प्र.पु.ए.व.) | पश्येत् | देख लेना चाहिए | to have a look | |
| आयाति (आ+ √या, लट्.प्र. पु.ए.व.) | आगच्छति | आता है | coming | |
| करव्यवस्था (स्त्री.प्र.वि.ए.व.) | करस्य आदानप्रदानयोः व्यवस्था | कर लेने और देने की व्यवस्था | taxation system | |
| धान्यषड्भागम् (षष्ठीतत्पुरुषः) | धान्यस्य षड्भागम् | धान का छठा भाग | one of the sixth part | |
| पण्यदशभागम् (षष्ठीतत्पुरुषः) | पण्यस्य दशभागम् | व्यापार का दसवाँ भाग | one of the tenth part of earning | |
| हिरण्यम् | सुवर्णम् | सोना | gold | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| संविधानकर्तृभिः (षष्ठीतत्पुरुषः) | संविधानस्य कर्तृभिः | संविधान के निर्माताओं द्वारा | by makers of the constitution | |
| जिज्ञासाशमनार्थम् (षष्ठीतत्पुरुषः) | जिज्ञासायाः शमनार्थम् | जिज्ञासा की शान्ति हेतु | quenching the thirst for knowing | |
| दिङ्मात्रम् (अव्ययपदम्) | दिशादर्शनमात्रम् | केवल दिशासूचक | mere indication | |
| विधेयः (पुं.प्र.वि.ए.व.) | करणीयः | करना चाहिए | should do | |
| भारतीयसंविधानम् | भारतीयं च तत् संविधानम् | भारत का संविधान | the constitution of Bharat | |
| अधिगन्तुम् (अधि+ √गम्+तुमुन्) | ज्ञातुम् | जानने के लिए | to understand | |
| शुभमस्तु (शुभम्+अस्तु) | मङ्गलं भवतु | भला हो | good will | |

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

१. **एकवाक्येन उत्तरं लिखत —**

(क) छात्रैः पुस्तकालयं गत्वा किं पुस्तकं दृष्टम् ?

(ख) छात्राः केन लिखितं पुस्तकं दृष्टवन्तः ?

(ग) *अर्थशास्त्रे* विशेषतः के विषयाः उक्ताः?

(घ) कानि संहृत्य *अर्थशास्त्रं* कृतम्?

(ङ) राज्यस्य अङ्गानि कानि?

(च) न्यायस्य चत्वारः पादाः के?

(छ) अस्मिन् पाठे पठितानि ध्येयवाक्यानि चित्वा लिखत?

(ज) 'कोषपूर्वाः समारम्भाः', तस्मात् किं कर्तव्यम्?

(झ) कररूपेण किं किं देयम्?

### २. कोष्ठके प्रदत्तानि पदानि अर्थानुसारं रिक्तस्थानेषु योजयत—

स्वामी, अमात्यः, दुर्गम्, कोषः , मित्रम्

(क) यः शासनविषये परामर्शं यच्छति ..................................

(ख) यः शासनं करोति ..................................

(ग) देशः यः मैत्रीभावेन तिष्ठति ..................................

(घ) सुरक्षितं स्थानं यत्र भोजनम् अभयं च अस्ति ..................................

(ङ) यत्र देशस्य धन-धान्यादीनां सङ्ग्रहः भवति ..................................

### ३. अधोलिखितानां वाक्यानां पाठात् समानार्थकसूक्तिः चित्वा लिखत—

(क) धर्मः अस्ति चेत् तत्र जयः अपि भविष्यति।

(ख) धर्मस्य प्रवर्तनार्थं वयं तिष्ठामः।

(ग) निश्चितं यत् सत्यं जयति।

(घ) शासकस्य प्रियं तु प्रजानां हिते भवेत्।

(ङ) धनं विना काऽपि योजना न प्रवर्तेत।

### ४. अनुच्छेदं पठित्वा अधः प्रदत्तप्रश्नानाम् उत्तराणि लिखत—

लोके सर्वेऽपि सुखमिच्छन्ति। धनं, पदवीं, साधनानि सर्वमपि सुखार्थमेव खलु जनाः अर्जयन्ति। चाणक्यस्य *अर्थशास्त्रे* अयमेव विषयः व्यावहारिकतया उक्तः। धर्मस्य कारणं धनमस्ति। अर्थस्य कारणं राज्यमस्ति। राज्यस्य कारणम् इन्द्रियजयः। इन्द्रियजयस्य कारणं विनयः अस्ति। विनयस्य कारणं वृद्धोपसेवा अस्ति।

© NCERT not to be republished

वृद्धोपसेवायाः कारणं ज्ञानम् अस्ति। मोक्षरूपिणा ज्ञानेन आत्मानं नियन्त्रयेत्। नियन्त्रितात्मा जितात्मा भवति। जितात्मा इच्छानुसारं फलानि प्राप्नोति। प्रायः धनं प्राप्य एव सुखं भवति इति मन्यते। किन्तु यदा कदा धनेन सुखं न लभ्यते इत्यपि अस्माकम् अनुभवः भवति। एकम् अनुपस्थितं तत्त्वं (Missing Element ) वयं तत्र न अवलोकयामः। धनाद् धर्मः ततः सुखम् इति। धनस्य सुखस्य च मध्ये धर्मः भवेद् इति अर्थः। अतः धर्मानुसारं प्राप्तं धनमेव सुखं ददाति। अतः उक्तम्-सुखस्य मूलं धर्मः धर्मस्य मूलं धनमिति। उक्तं च सङ्ग्रहेण सुभाषिते —

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततस्सुखम् ॥**

(क) सुखार्थं जनाः किं किम् अर्जयन्ति ?

(ख) सुखस्य मूलं ............. अस्ति।

(ग) जितात्मा किं प्राप्नोति ?

(घ) सुभाषिते त्रीणि क्रियापदानि सन्ति। प्रथमं ............. द्वितीयं ............... इति तृतीयं च आप्नोति इति।

## स्वाध्यायान्मा प्रमदः

१. सुखस्य मूलं धर्मः। धर्मस्य मूलम् अर्थः। अर्थस्य मूलं राज्यम्। राज्यस्य मूलमिन्द्रियजयः। इन्द्रियजयस्य मूलं विनयः। विनयस्य मूलं वृद्धोपसेवा। वृद्धोपसेवायाः मूलं विज्ञानम्। विज्ञानेन आत्मानं सम्पादयेत्। सम्पादितात्मा जितात्मा भवति। जितात्मा सेवार्थैः संयुज्येत। (चाणक्यप्रणीतसूत्रम्, १-१०)

२. अमरकोशः इति आचार्येण अमरसिंहेन लिखितः कोशग्रन्थः। तस्य त्रीणि काण्डानि सन्ति। प्रत्येकं काण्डे विविधाः वर्गाः सन्ति। स्वर्गादिवर्गे स्वर्गः, देवः , असुरः इत्येतादृशानि पदानि लिङ्गभेदसहितं तेषां पर्यायपदैः सह दत्तानि सन्ति। तत्र तृतीये काण्डे नानार्थवर्गः अस्ति, यस्य प्रथमः श्लोकः अधः प्रस्तुतः अस्ति —

**आकाशे त्रिदिवे नाको लोकस्तु भुवने जने।**
**पद्ये यशसि च श्लोकः शरे खड्गे च सायकः ॥**

यथा — नाकः इति पदस्य आकाशः स्वर्गं च इति अर्थद्वयम्।

© NCERT not to be republished



## यस्तु क्रियावान् मनुजः स विद्वान्

- ६, ७, ८, ९ कक्षाणां पाठ्यपुस्तकानि परिशील्य अमरकोशवाक्यानि सङ्गृह्य लिखन्तु उच्चारणं च कुर्वन्तु।
- भवतां विद्यालयस्य सामाजिकविज्ञानशिक्षकस्य साहाय्येन भारतदेशस्य प्राशासनिकपदानां मन्त्रिणां च वंशवृक्षं स्फोरकपत्रे निर्माय कक्षायां प्रदर्शयन्तु।
- *अर्थशास्त्रस्य* रचना विभाजनं वा नामसहितं प्रदर्शयितुम् ए.आई. (कृत्रिमबुद्धिमत्ता) द्वारा फलकनिर्माणं कुर्वन्तु।
- अन्तर्जालं परिशील्य अर्थव्यवस्थाविषये कक्षायां वाद-विवादात्मकं वाचिकं प्रसङ्गं प्रस्तुवन्तु।
- अस्मिन् पाठे समागतानि ध्येयवाक्यानि विलिख्य दशानां प्रसिद्धसंस्थानां नामानि ध्येयवाक्यानि च फलकेषु स्फोरकपत्रेषु लिखित्वा कक्षायां प्रस्तुवन्तु।
- उदाहरणम्— यतो धर्मस्ततो जयः, सत्यमेव जयते, धर्मचक्रप्रवर्तनाय।
- कोष्ठात् शब्दान् स्वीकृत्य वाक्यनिर्माणं कुर्वन्तु।

अस्माभिः, अर्थशास्त्रं, धर्मानुसारमेव, तत्र, अस्माकं, स्वामी, ग्रन्थे, राजा, सत्यमेव जयते, कर्त्तव्यविषये

पुस्तकं, कौटिल्येन, न्यायः, आचारविषये, देशे, इत्युक्ते, न्यायसंहिता, निर्णयं, इति, चर्चा

दृष्टम्, लिखितम्, भवति, लिखितः, राजा, प्रचलति, चर्चिता, श्राव्येत्, ध्येयवाक्यम्, स्यात्

© NCERT not to be republished